श्री सुब्रह्मण्य भुजंग प्रयात स्तोत्रं

श्री सुब्रह्मण्य भुजंग प्रयात स्तोत्रं

भजेऽहं कुमारं भवानीकुमारं
गलोल्लासिहारं नमत्सद्विहारं |
रिपुस्तोमपारं नृसिंहावतारं
सदानिर्विकारं गुहं निर्विचारं || 1 ||

नमामीशपुत्रं जपाशोणगात्रं
सुरारातिशत्रुं रवींद्वग्निनेत्रं |
महाबर्हिपत्रं शिवास्याब्जमित्रं
प्रभास्वत्कळत्रं पुराणं पवित्रं || 2 ||

अनेकार्ककोटि-प्रभावज्ज्वलं तं
मनोहारि माणिक्य भूषोज्ज्वलं तं |
श्रितानामभीष्टं निशांतं नितांतं
भजे षण्मुखं तं शरच्चंद्रकांतं || 3 ||

कृपावारि कल्लोलभास्वत्कटाक्षं
विराजन्मनोहारि शोणांबुजाक्षं |
प्रयोगप्रदानप्रवाहैकदक्षं
भजे कांतिकांतं परस्तोमरक्षं || 4 ||

सुकस्तूरिसिंदूरभास्वल्ललाटं
दयापूर्णचित्तं महादेवपुत्रं |
रवींदूल्लसद्रत्नराजत्किरीटं
भजे क्रीडिताकाश गंगाद्रिकूटं || 5 ||

सुकुंदप्रसूनावळीशोभितांगं
शरत्पूर्णचंद्रप्रभाकांतिकांतं |
शिरीषप्रसूनाभिरामं भवंतं
भजे देवसेनापतिं वल्लभं तं || 6 ||

सुलावण्यसत्सूर्यकोटिप्रतीकं
प्रभुं तारकारिं द्विषड्बाहुमीशं |
निजांकप्रभादिव्यमानापदीशं
भजे पार्वतीप्राणपुत्रं सुकेशं || 7 ||

अजं सर्वलोकप्रियं लोकनाथं
गुहं शूरपद्मादिदंभोळिधारं |
सुचारुं सुनासापुटं सच्चरित्रं
भजे कार्तिकेयं सदा बाहुलेयं || 8 ||

शरारण्यसंभूतमिंद्रादिवंद्यं
द्विषड्बाहुसंख्यायुधश्रेणिरम्यं |
मरुत्सारथिं कुक्कुटेशं सुकेतुं
भजे योगिहृत्पद्ममध्याधिवासं || 9 ||

विरिंचींद्रवल्लीश देवेशमुख्यं
प्रशस्तामरस्तोमसंस्तूयमानं |
दिश त्वं दयाळो श्रियं निश्चलां मे
विना त्वां गतिः का प्रभो मे प्रसीद || 10 ||

पदांभोजसेवा समायातबृंदा-
रकश्रेणिकोटीरभास्वल्ललाटं |
कळत्रोल्लसत्पार्श्वयुग्मं वरेण्यं
भजे देवमाद्यंतहीनप्रभावं || 11 ||

भवांभोधिमध्ये तरंगे पतंतं
प्रभो मां सदा पूर्णदृष्ट्या समीक्ष्य |
भवद्भक्तिनावोद्धर त्वं दयाळो
सुगत्यंतरं नास्ति देव प्रसीद || 12 ||

गळे रत्नभूषं तनौ मंजुवेषं
करे ज्ञानशक्तिं दरस्मेरमास्ये |
कटिन्यस्तपाणिं शिखिस्थं कुमारं
भजेऽहं गुहादन्यदेवं न मन्ये || 13 ||

दयाहीनचित्तं परद्रोहपात्रं
सदा पापशीलं गुरोर्भक्तिहीनं |
अनन्यावलंबं भवन्नेत्रपात्रं
कृपाशील मां भो पवित्रं कुरु त्वं || 14 ||

महासेन गांगेय वल्लीसहाय
प्रभो तारकारे षडास्यामरेश |
सदा पायसान्नप्रदातर्गुहेति
स्मरिष्यामि भक्त्या सदाहं विभो त्वां || 15 ||

प्रतापस्य बाहो नमद्वीरबाहो
प्रभो कार्तिकेयेष्टकामप्रदेति |
यदा ये पठंते भवंतं तदेवं
प्रसन्नस्तु तेषां बहुश्रीं ददासि || 16 ||

अपारातिदारिद्र्यवाराशिमध्ये
भ्रमंतं जनग्राहपूर्णे नितांतं |
महासेन मामुद्धर त्वं कटाक्षा-
वलोकेन किंचित्प्रसीद प्रसीद || 17 ||

स्थिरां देहि भक्तिं भवत्पादपद्मे
श्रियं निश्चलां देहि मह्यं कुमार |
गुहं चंद्रतारं सुवंशाभिवृद्धिं
कुरु त्वं प्रभो मे मनः कल्पसालः || 18 ||

नमस्ते नमस्ते महाशक्तिपाणे
नमस्ते नमस्ते लसद्वज्रपाणे |
नमस्ते नमस्ते कटिन्यस्तपाणे
नमस्ते नमस्ते सदाभीष्टपाणे || 19 ||

नमस्ते नमस्ते महाशक्तिधारिन्
नमस्ते सुराणां महासौख्यदायिन् |
नमस्ते सदा कुक्कुटेशाख्यक त्वं
समस्तापराधं विभो मे क्षमस्व || 20 ||

कुमारात्परं कर्मयोगं न जाने
कुमारात्परं कर्मशीलं न जाने |
य एको मुनीनां हृदब्जाधिवासः
शिवांकं समारुह्य सत्पीठकल्पं || 21 ||

विरिंचाय मंत्रोपदेशं चकार
प्रमोदेन सोऽयं तनोतु श्रियं मे |
यमाहुः परं वेद शूरेषु मुख्यं
सदा यस्य शक्त्या जगत्भीतभीता || 22 ||

यमाश्रित्य देवाः स्थिरं स्वर्गपालाः
सदोंकाररूपं चिदानंदमीडे |
गुहस्तोत्रमेतत् कृतं तारकारे
भुजंगप्रयातेन हृद्येन कांतं || 23 ||

जना ये पठंते महाभक्तियुक्ताः
प्रमोदेन सायं प्रभाते विशेषः |
न जन्मर्क्षयोगे यदा ते रुदांता
मनोवांछितान् सर्वकामान् लभंते || 23 ||

इति श्री सुब्रह्मण्य भुजंग प्रयात स्तोत्रं |